# कक्षा – द्वादशी
## संस्कृतम् (ऐच्छिकम्) कोड् सङ्ख्या – 022
## आदर्शप्रश्नपत्रम् – 2023-24

**समयः – होरात्रयम्** **पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रमुखाः प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् -**

| | |
|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः (ख) रचनात्मक–कार्यम् | - 10 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त–व्याकरणम् | - 15 अङ्काः |
| खण्डः (घ) (I) पठित-अवबोधनम् | - 25 अङ्काः |
| (II) संस्कृतसाहित्येतिहासपरिचयः | - 10 अङ्काः |
| खण्डः (ङ) छन्दोऽलङ्कारपरिचयः | - 10 अङ्काः |

**निर्देशाः –**

(i) अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **खण्डः - 'क'**<br>**अपठित-अवबोधनम्  10 अङ्काः** | |
| **1.** | *** अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –**<br>मानवजीवने परिश्रमस्य नितरां महत्त्वम् अस्ति। परिश्रमेण एव सर्वाणि कार्याणि पूर्णानि भवन्ति। उक्तमपि यत् "उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।" केवलं मनसि चिन्तनेनैव न किमपि कार्यं भवितुं शक्नोति। मनोवाञ्छितं लक्ष्यं साधयितुं मनः इन्द्रियाणि च संयम्य निरन्तरं परिश्रमम् आवश्यकं भवति। भाग्यमपि परिश्रमं विना नैव फलति। छात्रजीवने तु परिश्रमस्य महत्त्वं सर्वाधिकं वर्तते। यः छात्रः परिश्रमशीलः स्वाध्यायपरायणः च भवति, सः सदैव सफलतां लभते। ये छात्राः नियमपूर्वकं परिश्रमेण पाठं पठन्ति स्मरन्ति च ते सदा परीक्षायां सफलाः भवन्ति। जीवने सफलतायै परिश्रमम् अतिरिच्य नास्ति कश्चिदन्यः विकल्पः। परिश्रमिणः जनाः केवलम् आत्मन एव उन्नतिं विकासं च न कुर्वन्ति अपितु समाजस्य राष्ट्रस्य चापि उत्थानं कुर्वन्ति। उद्यमशीलाः जनाः समाजे सर्वत्र सम्मानं कीर्तिञ्च लभन्ते। सत्यमेवोक्तं केनचित् कविना "प्रयत्नादयोग्याः सुयोग्या भवन्ति।" प्रयत्नेन एव मूर्खा अपि विद्वांसः भवन्ति। अतः अस्माभिः आलस्यं प्रमादञ्च विहाय सर्वथा प्रयत्नो विधेयः। उक्तम् हि-"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।" | 10 |
| | **(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) का उद्योगिनं पुरुषम् उपैति?<br>(ख) मानवजीवने कस्य नितरां महत्त्वम् अस्ति?<br>(ग) परिश्रमस्य सर्वाधिकं महत्त्वं कदा वर्तते? | 1×2=2 |
| | **(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) मनोवाञ्छितं लक्ष्यं साधयितुं किम् आवश्यकं भवति?<br>(ख) के छात्राः परीक्षायां सफलाः भवन्ति?<br>(ग) परिश्रमिणः जनाः किं कुर्वन्ति? | 2×2=4 |
| | **(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत-** | 1 |
| | **(ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्)**<br>(क) 'परिश्रमेण' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?<br>(i) मनोरथैः  (ii) उद्योगिनम्<br>(iii) परिश्रमम्  (iv) उद्यमेन<br>(ख) 'उद्यमशीलाः जनाः समाजे सर्वत्र सम्मानं कीर्तिञ्च लभन्ते' अत्र 'लभन्ते' इति क्रियापदस्य कर्तृपदं किम्?<br>(i) उद्यमशीलाः  (ii) सम्मानम्<br>(iii) जनाः  (iv) कीर्तिम् | 1×3=3 |

| | | |
|---|---|---|
| | (ग) 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः' अत्र किं विशेषणपदम् अस्ति?<br>(i) उद्योगिनम् (ii) पुरुषसिंहम्<br>(iii) लक्ष्मीः (iv) उपैति<br>(घ) 'उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः' वाक्येऽस्मिन् क्रियापदं किं प्रयुक्तम्?<br>(i) कार्याणि (ii) सिध्यन्ति<br>(iii) उद्यमेन (iv) मनोरथैः | |
| | | |
| | **खण्डः - 'ख'**<br>**रचनात्मक–कार्यम्** **10 अङ्काः** | |
| 2. | * भवतः विद्यालयस्य शिक्षकाः शैक्षिकभ्रमणाय छात्रान् हरिद्वारस्थितं पतञ्जलियोगपीठं नेष्यन्ति। भवानपि तत्र गन्तुम् इच्छति। एतदर्थम् अनुमतिं धनञ्च प्राप्तुं पितरं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत।<br>**मञ्जूषा**<br>अहम्, आदरणीयाः, सादरम्, मम, अध्यापकाः, हरिद्वारम्, प्रणामाः, अत्र, कुशली, अनुमतिम्, तैः सह, शैक्षिकभ्रमणाय,इच्छामि, सार्धद्विसहस्रम्, रूप्यकाणि, प्रेषयन्तु, मातरम्, मार्गव्ययार्थम, भवतः, अनुजाय, प्रणामान्, स्नेहः<br>**अथवा**<br>* स्वक्षेत्रस्य नगरनिगमाधिकारिणं प्रति पत्रं लिखित्वा निवेदयतु यत् भवतां क्षेत्रे मार्गेषु रथ्यासु च सर्वत्र अस्वच्छता व्याप्ता अस्ति। अनेन कारणेन क्षेत्रवासिनः महत्कष्टम् अनुभवन्ति। रोगाणाम् अपि आशङ्का वर्तते। कृपया अस्मिन् विषये विशिष्टं ध्यानं दत्वा यथाशीघ्रं स्वच्छतायाः व्यवस्थां कारयतु।<br>**मञ्जूषा**<br>निगमाधिकारिमहोदयः, सेवायाम्, श्रीमन्तः, अस्माकम्, सर्वत्र, विद्यते, क्षेत्रे,अस्वच्छता, दुर्गन्धः, जीवनम्, क्षेत्रवासिनाम्, जीवनम्, कठिनम्, अनेके, रोगाः, जनाः, रुग्णाः,विशिष्टम्, ध्यानम्, यथाशीघ्रम्, व्यवस्थाम्, कारयतु, कर्मचारिणः, मार्गेषु, सञ्चरणम, भवति। | 1×5=5 |
| | | |
| 3. | * प्रदत्ततथ्यानां सहातया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत –<br>**विषयः – संसर्गजा दोषगुणाः भवन्ति।**<br>सङ्गतेः महत्त्वम्<br>सङ्गतेः प्रभावात् गुणदोषग्रहणम्<br>सत्सङ्गतेः महत्त्वप्रतिपादनम्<br>सत्सङ्गतेः लाभाः उपसंहारश्च | 5 |

**अथवा**

* हिन्दीभाषया आङ्ग्लभाषया वा लिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत -

1. संस्कृतभाषा का साहित्य अत्यन्त विशाल है।
   The literature of Sanskrit language is very vast.
2. रामायण की रचना महर्षि वाल्मीकि ने की थी।
   Ramayana was written by Maharisi Valmiki.
3. सब लोग सुखी और रोगरहित हों।
   May everyone be happy and healthy.
4. अच्छे स्वास्थ्य के लिए सबको योगाभ्यास करना चाहिए।
   Everyone should do yoga regularly for good health.
5. पर्यावरण की सुरक्षा सभी भारतीयों का कर्तव्य है।
   Protection of the environment is the duty of all Indians.
6. हम सब संस्कृत का प्रचार करेंगे।
   We all will promote Sanskrit.
7. कल आप लोग कहाँ गए थे?
   Where did you people go yesterday?

## खण्डः - 'ग'

## अनुप्रयुक्त–व्याकरणम्  15 अङ्काः

**4.** * अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं प्रश्नत्रयम्) 1×3=3

(क) <u>नृपः+अर्थिकामाद्</u> अधिकप्रदश्च।

(ख) पश्यत <u>एभिर्नीतः</u> अस्मि।

(ग) न हि कश्चित्क्षणमपि जातु <u>तिष्ठत्यकर्मकृत्</u>।

(घ) शताधिकाः अनाथशिशवः लालिताः <u>पालिताः+च</u>।

**5.** रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्) 1×3=3

(क) धनविषये सञ्चयो न <u>कर्तव्यः</u>।

(i) कृ+अनीयर्  (ii) कृ+शानच्

(iii) कृ+तव्यत्  (iv) कृ+क्तवतु

| | | |
|---|---|---|
| | (ख) गिरौ **<u>कलाप+णिनि</u>** गगने पयोदः।<br>(i) कलापिनी (ii) कलापी<br>(iii) कलापेन (iv) कलापिन्<br>(ग) भो भोः तत्किम् **<u>अक्षत्रिया</u>** पृथ्वी।<br>(i) अक्षत्रिय + टाप् (ii) अक्षत्रिय + क्त<br>(iii) अक्षत्रिय + ङीप् (iv) अक्षत्रिय + अच्<br>(घ) मानवः कर्माणि **<u>कृ + शतृ</u>** शतं समाः जीवेत्।<br>(i) कुर्वन्तः (ii) कुर्वतः<br>(iii) कुर्वन् (iv) कुर्वत् | |
| | | |
| 6. | **मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत। (केवलं प्रश्नत्रयम्)**<br>(क) यदि ते सन्ति सन्त्येव केयम् ........... विभीषिका?<br>(ख) जगाद .......... जगदेकनाथः।<br>(ग) ......... आश्वमेधिकोऽयमश्वः।<br>(घ) सैनिकः ........... उद्घोषयति।<br>**मञ्जूषा**<br>नूनम्, अद्य, उच्चैः, भूयः | 1×3=3 |
| | | |
| 7. | **कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)**<br>(क) शिववीरचरः .......... न विरमति। (निजकार्य)<br>(ख) वित्तं ............ विना सफलं न भवति। (दानभोग)<br>(ग) एतेषां रत्नानां मध्ये यत् ............ रोचते तद् गृहाण। (युष्मत्)<br>(घ) भवन्तः विद्यालयं .......... पूर्वं मातरं पितरञ्च प्रणमन्तु। (गमन) | 1×3=3 |
| | | |
| 8. | *** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समासं वा चित्वा लिखन्तु। (केवलं प्रश्नत्रयम्)**<br>(क) **<u>वरतन्तोः शिष्यः</u>** गुरुदक्षाणार्थी कौत्सः क्षतीशं प्राप्तवान्।<br>(i) वरतन्तोशिष्यः (ii) वरतन्तुशिष्यः<br>(iii) वरतन्तुशिष्याः (iv) शिष्यवरतन्तुः | 1×3=3 |

| | | |
|---|---|---|
| | (ख) विधिज्ञः मानधनाग्रयायी नृपः **तपोधनं** कौत्सशिष्यम् उवाच।<br>(i) तपः एव धनं यस्य तम् (ii) तपः एव धनं यस्य तस्य<br>(iii) तपः एव धनं यस्य सः (iv) तपः एव धनं यस्य तेन<br>(ग) लवः **विनयेन सहितम्** जनकं प्रणमति।<br>(i) विनयसहितम् (ii) सविनयः<br>(iii) सविनयेन (iv) सविनयम्<br>(घ) बुद्धियुक्तो जहातीह उभे **सुकृतदुष्कृते**।<br>(i) सुकृतं च दुष्कृतं (ii) सुकृते च दुष्कृते च<br>(iii) सुकृतं च दुष्कृतं च (iv) सुकृतः च दुष्कृतः च | |
| | | |
| | **खण्डः - (घ)**<br>(I) **पठितावबोधनम् 25 अङ्काः** | |
| | | |
| 9. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>ततो ब्राह्मणस्तानि रत्नानि गृहीत्वा उज्जयिनीं यावदागतस्तावद्यज्ञसमाप्तिर्जाता। राजावभृथस्नानं कृत्वा सर्वानर्थिजनान् परिपूर्णमनोरथानकरोत्। ब्राह्मणो राजानं दृष्ट्वा रत्नान्यर्पयित्वा प्रत्येकं तेषां गुणकथनमकथयत्। ततो राजावदत्, "भो ब्राह्मण! भवान् यज्ञदक्षिणाकालं व्यतिक्रम्य समागतः। मया सर्वोऽपि ब्राह्मणसमूहो दक्षिणया तोषितः। तर्हि त्वमेतेषां रत्नानां मध्ये यत्तुभ्यं रोचते तद्गृहाणेति। ब्राह्मणेनोक्तम्, 'गृहं गत्वा गृहिणीं, पुत्रं, स्नुषां च पृष्ट्वा सर्वेभ्यो यद्रोचते तद्ग्रहीष्यामीति। 'राज्ञोक्तं 'तथा कुरु।' ब्राह्मणोऽपि स्वगृहमागत्य सर्वं वृत्तान्तं तेषामग्रेऽकथयत्। पुत्रेणोक्तं 'यद्रत्नं चतुरङ्गबलं ददाति तद्ग्रहीष्यामः यतः सुखेन राज्यं कर्त्तुमर्हिष्यामः।' | 5 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) ब्राह्मणः रत्नानि गृहीत्वा कुत्र आगतः?<br>(ii) कः स्वगृहमागत्य सर्वं वृत्तान्तम् अकथयत्?<br>(iii) ब्राह्मणः कं व्यतिक्रम्य समागतः? | ½x2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम् )**<br>(i) ब्राह्मणस्य पुत्रेण किम् उक्तम्?<br>(ii) राजा अवभृथस्नानं कृत्वा किमकरोत्?<br>(iii) राजा यदा ब्राह्मणं यथेच्छं रत्नमेकं ग्रहीतुमकथयत् तदा ब्राह्मणेन किमुक्तम्? | 1x2=2 |
| | *** (इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) 'अकरोत्' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?<br>(ii) 'सर्वानर्थिजनान्' इत्यनयोः पदयोः विशेष्यपदं किम्? | 1x2=2 |

| | | |
|---|---|---|
| | (iii) 'पुत्रवधूम्' इति अर्थे गद्यांशे किं प्रयुक्तम्। | |
| | | |
| 10. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -**<br>**गुर्वर्थमर्थी श्रुतपारदृश्वा रघो सकाशादनवाप्य कामम्।**<br>**गतो वदान्यान्तरमित्ययं मे मा भूत् परीवादनवावतारः।।**<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कीदृशः अर्थी रघोः सकाशाद् गन्तुं शक्नोति?<br>(ii) कौत्सः कियदर्थं प्राप्तुमिच्छति?<br>(iii) कस्य नवावतारः मा अभूत्?<br>(आ) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नद्वयम् )<br>(i) कौत्सः रघोः सकाशात् कुत्र गन्तुं शक्नोति?<br>(ii) परीवादः कस्य भवितुं शक्नोति?<br>(iii) अर्थी यदि रघोः सकाशात् कामम् अनवाप्य गमिष्यति तदा किं भविष्यति?<br>* (इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) 'अर्थी' इति पदस्य विशेषणपदं श्लोके किं प्रयुक्तम्?<br>(ii) 'गतः' इति क्रियापदस्य कर्तृपदं श्लोके किं प्रयुक्तम्?<br>(iii) 'अन्यदातारम्' इति अर्थे श्लोके किं पदं प्रयुक्तम्? | 5<br><br><br>½x2=1<br><br><br><br>1x2=2<br><br><br><br>1x2=2 |
| | | |
| 11. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>कौशल्या – जात! अस्ति ते माता? स्मरसि वा तातम्?<br>लवः – नहि।<br>कौशल्या – ततः कस्य त्वम् ?<br>लवः – भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।<br>कौशल्या – अयि जात! कथयितव्यं कथय।<br>लवः – एतावदेव जानामि।<br>( प्रविश्य सम्भ्रान्ताः )<br>बटवः – कुमार ! कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः।<br>लवः – 'अश्वोऽश्व' इति नाम पशुसमाम्नाये साङ्ग्रामिके च पठ्यते,तद्ब्रूत-कीदृशः?<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) के सम्भ्रान्ताः प्रविशन्ति?<br>(ii) किं लवः तातं स्मरति?<br>(iii) अश्वः स्वयं कैः प्रत्यक्षीकृतः? | 5<br><br><br><br><br><br><br><br><br><br><br>½x2=1 |

| | | |
|---|---|---|
| | (आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) लवः आत्मानं कस्य पुत्रं जानाति?<br>(ii) पशुसमाम्नाये किं पठ्यते?<br>(iii) बटुभिः भूतविशेषः कुत्र अनुश्रूयते?<br>* (इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) 'निष्क्रम्य' इति पदस्य विलोमपदं नाट्यांशे किं प्रयुक्तम्?<br>(ii) 'अयि जात! कथयितव्यं कथय' वाक्येऽस्मिन् किं क्रियापदं प्रयुक्तम्?<br>(iii) 'भगवतः सुगृहीतनामधेयस्य वाल्मीकेः' अत्र विशेष्यपदं किमस्ति? | 1×2=2<br><br><br><br>1×2=2 |
| | | |
| 12. | * अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्)<br>(क) प्रीतहृदयश्चन्द्रापीडः **स्वभवनम्** आजगाम।<br>(ख) राजानः प्रायः हितोपदेशदायिनः **गुरून्** खेदयन्ति।<br>(ग) दृढसङ्कल्पोऽयं **सादी** स्वकार्यात् न विरमति।<br>(घ) वनानि प्रतिक्षणमधिकाधिकां **श्यामतां** कलयन्ति।<br>(ङ) योगाचार्यः **योगाङ्गानां नामानि लक्षणानि च** अवबोधयति। | 1×4=4 |
| | | |
| 13. | अधोलिखितस्य श्लोकस्य अन्वयं लिखत।<br>**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**<br>**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥** | 3 |
| | | |
| 14. | अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत।<br>**नियतं कुरु कर्म त्वं कर्मज्यायो ह्यकर्मणः।**<br>**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥**<br>**अथवा**<br>'कार्यं वा साधयेयम्, देहं वा पातयेयम्' इति पाठम् आधृत्य शिववीरचरस्य चरित्रचित्रणं सङ्क्षेपेण संस्कृतभाषया लिखत। | 3 |
| | | |
| | खण्डः - (घ)<br>(II) संस्कृत–साहित्येतिहासस्य सामान्यः परिचयः 10 अङ्काः | |
| | | |
| 15. | अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) महाकाव्ये न्यूनातिन्यूनं कति सर्गाः भवन्ति ?<br>(i) सप्त (ii) अष्ट<br>(iii) दश (iv) दश | 1×3=3 |

| | | |
|---|---|---|
| | (ख) बुद्धचरितम् इति महाकाव्यस्य रचयिता क: विद्यते?<br>(i) कालिदास: (ii) भारवि:<br>(iii) अश्वघोष: (iv) भट्टि<br>(ग) महाकवे: कल्हणस्य प्रसिद्धं महाकाव्यं किम् ?<br>(i) राजतरंगिणी (ii) गउडवहो:<br>(iii) पृथ्वीराजविजयम् (iv) हर्षचरितम्<br>(घ) विक्रमाङ्कदेवचरितम् इति महाकाव्ये कस्य राज्ञ: यशोगानं विद्यते?<br>(i) हर्षवर्धनस्य (ii) कुमारपालस्य<br>(iii) गोनन्दस्य (iv) विक्रमादित्यस्य | |
| | | |
| 16. | प्रश्नानाम् उत्तराणि विकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) ------------ कवीनां निकषं वदन्ति।<br>(i) पद्यम् (ii) नाटकम्<br>(iii) गद्यम् (iv) चम्पूकाव्यम्<br>(ख) अधोलिखितेषु कस्य काव्यस्य नायक: चन्द्रापीड: वर्तते ? :<br>(i) दशकुमारचरितस्य (ii) कादम्बर्या:<br>(iii) शिवराजविजयस्य (iv) वासवदत्ताया:<br>(ग) कीदृशं काव्यं चम्पूकाव्यं कथ्यते?<br>(i) गद्यात्मकम् (ii) पद्यात्मकम्<br>(iii) गद्य-पद्यात्मकम् (iv) नाट्य-पद्यात्मकम्<br>(घ) भारतचम्पू: इतिकाव्यं केन विरचितम्?<br>(i) अनन्तभट्टेन (ii) नीलकण्ठदीक्षितेन<br>(iii) लक्ष्मणभट्टेन (iv) सोड्ढलेन | 1×3=3 |
| | | |
| 17. | प्रदत्तविकल्पेभ्य: समुचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)<br>(क) नाट्यवेद-संरचनायां ब्रह्मा सामवेदात् किं स्वीकृतवान्?<br>(i) पाठ्यम् (ii) गीतम्<br>(iii) अभिनयम् (iv) रस:<br>(ख) एतेषु नायिकारहितं नाटकं किम्?<br>(i) मृच्छकटिकम् (ii) शारिपुत्रप्रकरणम्<br>(iii) नागानन्दम् (iv) मुद्राराक्षसम्<br>(ग) 'रत्नावली' इति नाटिकाया: रचयिता क:?<br>(i) हर्ष: (ii) भवभूति:<br>(iii) विशाखदत्त: (iv) शूद्रक: | 1×4=4 |

| | | |
|---|---|---|
| | (घ) ----------- भवभूतिः विशिष्यते।<br>(i) अभिज्ञानशाकुन्तले (ii) वेणीसंहारे<br>(iii) उत्तररामचरिते (iv) मालतीमाधवे<br>(ङ) 'मालविकाग्निमित्रम्' इति नाटकस्य नायकः कः?<br>(i) दुष्यन्तः (ii) चारुदत्तः<br>(iii) अग्निमित्रः (iv) पुरुरवा | |
| | | |
| | **खण्डः -'ङ'**<br>**छन्दोऽलंकारपरिचयः - 10 अङ्काः** | |
| | | |
| 18. | (अ) * अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) मालिनी छन्दसः उदाहरणमेकं लिखत।<br>(ख) 'जतौ तु ----------- उदीरितं जरौ।' इति कस्य छन्दसः लक्षणम् अस्ति।<br>(ग) 'नगण' इत्यस्य चिह्नं लिखत।<br>(घ) 'उपजाति' छन्दसः लक्षणं लिखत।<br>(आ) *अधोलिखतासु श्लोकपङ्क्तिषु प्रयुक्तं छन्दं परिचीय तस्य नाम लिखत। (केवलं प्रश्नद्वयम्)<br>(क) सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।<br>(ख) निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।<br>(ग) यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः। | 1×3=3<br><br><br><br><br>1×2=2 |
| | | |
| 19. | (अ) *अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) उत्प्रेक्षालङ्कारस्य लक्षणं लिखत।<br>(ख) वर्णसाम्यम् --------------। रिक्तस्थानं पूरयित्वा लक्षणं पूर्णं कुरुत।<br>(ग) उपमालङ्कारस्य एकम् उदाहरणम् लिखत।<br>(घ) रूपकालङ्कारस्य लक्षणं किम् ?<br>(आ) * अधोलिखतासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत। (केवलं प्रश्नद्वयम्)<br>(क) शरीरमात्रेण नरेन्द्र तिष्ठन् आभासि तीर्थप्रतिपादितर्द्धिः।<br>आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः।।<br>(ख) आवेदितो वेदविदां वरेण।<br>(ग) पश्यामि ते मुखपुण्डरीकम्। | 1×3=3<br><br><br><br><br>1×2=2 |

**********************************